**CBSE कक्षा - 9 संस्कृत**
**एनसीईआरटी प्रश्न-उत्तर**
**पाठः - 7 प्रत्यभिज्ञानम्**

**अभ्यासः**

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**
   i. **भटः कस्य ग्रहणम् अकरोत्?**
   ii. **अभिमन्युः कथं गृहीतः आसीत्?**
   iii. **भीमसेनेन बृहन्नलया च पृष्टः अभिमन्युः किमर्थम् उत्तरं न ददाति?**
   iv. **अभिमन्युः स्वग्रहणे किमर्थम् वञ्चितः इव अनुभवति?**
   v. **कस्मात् कारणात् अभिमन्युः गोग्रहणं सुखान्तं मन्यते?**

   **उत्तराणि-**
   i. भटः सौभद्रस्य (अभिमन्योः) गृहणम् अकरोत्।
   ii. अभिमन्युः निश्शस्त्रेण पदातिना बाहुभ्याम् गृहीतः आसीत्।
   iii. भीमसेनेन बृहन्नलया च पृष्टः अभिमन्युः नाम्ना सम्बोधितः सन् उत्तरं न ददाति। सतः आत्मनः तिरस्कारं मन्यते।
   iv. अभिमन्युः अशस्त्रेण पदातिना गृहीतः। सः अशस्त्रे प्रहारं न अकरोत्। अतः सः स्वगृहणे वञ्चितः इव अनुभवति।
   v. पितृदर्शनात् अभिमन्यु गोग्रहणं सुखान्तं मन्यते।
2. **अधोलिखितवाक्येषु प्रकटितभावं चिनुत-**
   i. **भोः को नु खल्वेषः? येन भुजैकनियन्त्रितो बलाधिकेनापि न पीडितः अस्मि। (विस्मयः, भयम्, जिज्ञासा)**
   ii. **कथं कथं ! अभिमन्युर्नामाहम्। (आत्मप्रशंसा, स्वाभिमानः, दैन्यम्)**
   iii. **कथं मां पितृवदाक्रम्य स्त्रीगतां कथां पृच्छसे? (लज्जा, क्रोधः, प्रसन्नता)**
   iv. **धनुस्तु दुर्बलैः एव गृह्यते मम तु भुजौ एव प्रहरणम्। (अन्धविश्वासः, शौर्यम्, उत्साहः)**
   v. **बाहुभ्यामाहृतं भीमः बाहुभ्यामेव नेष्यति। (आत्मविश्वासः, निराशा, वाक्संयमः)**
   vi. **दिष्ट्या गोग्रहणं स्वन्तं पितरो येन दर्शिताः। (क्षमा, हर्षः, धैर्यम्)**

   **उत्तराणि-**
   i. जिज्ञासा, विस्मयः
   ii. स्वाभिमानः
   iii. क्रोधः
   iv. शौर्यम्
   v. आत्मविश्वासः
   vi. हर्षः।
3. **यथास्थानं रिक्तस्थानपूर्तिं कुरुत-**

| | | | |
|---|---|---|---|
| **(क)** | **खलु + एषः** | = | ___________ |
| **(ख)** | **बल + ___________ + अपि** | = | **बलाधिकेनापि** |
| **(ग)** | **विभाति + ___________** | = | **बिभात्युमावेषम्** |
| **(घ)** | **___________ + एनम्** | = | **वाचालयत्वेनम्** |
| **(ङ)** | **रुष्यति + एष** | = | **रुष्यत्येष** |
| **(च)** | **त्वमेव + एनम्** | = | ___________ |
| **(छ)** | **यातु + ___________** | = | **यात्विति** |
| **(ज)** | **___________ + इति** | = | **धनञ्जयायेति** |

**उत्तराणि-**

| | | | |
|---|---|---|---|
| (क) | खलु + एषः | = | खल्वेषः |
| (ख) | बल + अधिकेन + अपि | = | बलाधिकेनापि |
| (ग) | विभाति + उमावेषम् | = | बिभात्युमावेषम् |
| (घ) | वाचालयतु + एनम् | = | वाचालयत्वेनम् |
| (ङ) | रुष्यति + एष | = | रुष्यत्येष |
| (च) | त्वमेव + एनम् | = | त्वमेवेनम् |
| (छ) | यातु + इति | = | यात्विति |
| (ज) | धनञ्जनाय + इति | = | धनञ्जयायेति |

4. **अधोलिखितानि वचनानि कः कं प्रति कथयति-**

| | | **कः** | **कं प्रति** |
|---|---|---|---|
| **यथा-** | **आर्य, अभिभाषणकौतूहलं मे महत्** | **बृहन्नला** | **भीमसेनम्** |
| **(क)** | **कथमिदानीं सावज्ञमिव मां हस्यते** | ___________ | ___________ |
| **(ख)** | **अशस्त्रेणेत्यभिधीयताम्** | ___________ | ___________ |
| **(ग)** | **पूज्यतमस्य क्रियतां पूजा** | ___________ | ___________ |
| **(घ)** | **पुत्र ! कोऽयं मध्यमो नाम** | ___________ | ___________ |
| **(ङ)** | **शान्तं पापम् ! धनुस्तु दुर्बलैः एव गृह्यते** | ___________ | ___________ |

**उत्तराणि-**

| | | कः | कं प्रति |
|---|---|---|---|
| यथा- | आर्य, अभिभाषणकौतूहलं मे महत् | बृहन्नला | भीमसेनम् |
| (क) | कथमिदानीं सावज्ञमिव मां हस्यते | अभिमन्युः | बृहन्नलां भीमसेनं च |
| (ख) | अशस्त्रेणेत्यभिधीयताम् | अभिमन्युः | भीमसेनम् |
| (ग) | पूज्यतमस्य क्रियतां पूजा | उत्तरः | राजानम् (पितरम्) |
| (घ) | पुत्र ! कोऽयं मध्यमो नाम | भगवान् | अभिमन्युम् |
| (ङ) | शान्तं पापम् ! धनुस्तु दुर्बलैः एव गृह्यते | भीमसेनः | अभिमन्युम् |

5. **अधोलिखितानि स्थूलानि सर्वनामपदानि कस्मै प्रयुक्तानि-**
   i. **वाचालयतु एनम् आर्यः।**
   ii. **किमर्थं तेन पदातिना गृहीतः।**
   iii. **कथं न माम् अभिवादयसि।**
   iv. **मम तु भुजौ एव प्रहरणम्।**
   v. **अपूर्व इव ते हर्षो ब्रूहि केन विस्मितः?**

   **उत्तराणि-**
   i. 'अभिमन्युम्' इति कृते
   ii. 'भीमसेनेन' इति कृते
   iii. 'राजानम्' इतिकृते
   iv. 'भीमसेनस्य' इति कृते
   v. 'अभिमन्युग्रहणेन' इति कृते
6. **श्लोकानाम् अपूर्णः अन्वयः अधोदत्तः। पाठमाधृत्य रिक्तस्थानानि पूरयत-**
   i. **पार्थं पितरं मातुलं ............. च उद्दिश्य कृतास्त्रस्य तरुणस्य ............. युक्तः।**
   ii. **कण्ठश्लिष्टेन ............. जरासन्धं योक्त्रयित्वा तत् असह्यं ............. कृत्वा (भीमेन) कृष्णः अतदर्हतां नीतः।**
   iii. **रुष्यता ............. रमे। ते क्षेपेण न रुष्यामि, किं ............. अहं नापराद्धः, कथं (भवान्) तिष्ठति, यातु इति।**
   iv. **पादयोः निग्रहोचितः समुदाचारः ............. । बाहुभ्याम् आहृतम् (माम्) ............. बाहुभ्याम् एव नेष्यति।**

   **उत्तराणि-**
   i. जनार्दनम्, युद्धपराजयः
   ii. बाहुना, कर्म
   iii. भवता, उक्त्वा
   iv. क्रियताम्, भीमः
7. **(क) अधोलिखितेभ्यः पदेभ्यः उपसर्गान् विचित्य लिखत-**

| पदानि | | उपसर्गः |
|---|---|---|

| | | | |
|---|---|---|---|
| **यथा-** | **आसाद्य** | **-** | **आ** |
| **(i)** | **अवतारितः** | **-** | ____________ |
| **(ii)** | **विभाति** | **-** | ____________ |
| **(iii)** | **अभिभाषय** | **-** | ____________ |
| **(iv)** | **उद्भूताः** | **-** | ____________ |
| **(v)** | **तिरस्क्रियते** | **-** | ____________ |
| **(vi)** | **प्रहरन्ति** | **-** | ____________ |
| **(vii)** | **उपसर्पतु** | **-** | ____________ |
| **(viii)** | **परिरक्षिताः** | **-** | ____________ |
| **(ix)** | **प्रणमति** | **-** | ____________ |

**उत्तराणि-**

| **पदानि** | | | **उपसर्गः** |
|---|---|---|---|
| **यथा-** | आसाद्य | - | आ |
| (i) | अवतारितः | - | अव |
| (ii) | विभाति | - | वि |
| (iii) | अभिभाषय | - | अभि |
| (iv) | उद्भूताः | - | उत् |
| (v) | तिरस्क्रियते | - | तिरः |
| (vi) | प्रहरन्ति | - | प्र |
| (vii) | उपसर्पतु | - | उप |
| (viii) | परिरक्षिताः | - | परि |
| (ix) | प्रणमति | - | प्र |

**(ख) उदाहरणमनुसृत्य कोष्ठकदत्तपदेषु पञ्चमीविभक्तिं प्रयुज्य वाक्यानि पूरयत-**

**यथा-** श्मशानाद् धनुरादाय अर्जुनः आगतः। (श्मशान)

i. **पाठान् पठित्वा सः ____________ आगतः। (विद्यालय)**

ii. **____________ पत्राणि पतन्ति। (वृक्ष)**

iii. **गङ्गा ___________ निर्गच्छति। (हिमालय)**
iv. **क्षमा ___________ फलानि आनयति। (आपण)**
v. **___________ बुद्धिनाशो भवति। (स्मृतिनाश)**

**उत्तराणि-**

i. विद्यालयत्
ii. वृक्षात्
iii. हिमालयात्
iv. आपणात्
v. स्मृतिनाशात्